ओड़िका, स्त्री, धान्यविशेषः। उड़ि धान इति भाषा। तत्पर्य्यायः। ओड़ी २ नीवारः ३। इति रत्नमाला॥ अस्या गुणाः। शोषणत्वम्। रूक्षत्वम्। कफवायुवर्द्धकत्वम्। पित्तनाशित्वञ्च। इति राजवल्लभः॥

ओड़ी, स्त्री, ओड़िकाधान्यम्। इति रत्नमाला॥ (नीवारशब्देऽस्या विवरणं ज्ञातव्यम्॥)

ओड्रः पुं, (आ ईषदुनत्ति। उन्दी+स्फायितञ्चीति रक्। बाहुलकात् दस्य डत्वम्।) जवापुष्पवृक्षः। देशविशेषः। उड़िस्या इति ख्यातः। तत्र बहुवचनान्तः। इति मेदिनी॥ (तद्देशवासिनि, त्रि। यथा, मनुः १०। ४४।

"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा जवनाः शकाः"।

"पौण्ड्रादिदेशोद्भवाः क्षत्रियाः सन्तः क्रियालोपादिना शूद्रत्वमापन्नाः"।

इति तट्टीकायां कुल्लूकभट्टः॥)

ओड्रपुष्पं, क्ली, (ओड्रं पुष्पम्।) जवा। इत्यमरः॥ वृद्धास्तु "ओड्रपुष्पशब्देन तथा जवाशब्देन ओड्रवृक्षः ओड्रस्य पुष्पञ्चोच्यते" इत्याहुः। वृत्ते व्युत्पत्तिर्यथा। ओड्रं पुष्पमस्य इति।

"ओड्रः स्यादोड्रपुष्पञ्च जवाथ हयमारकः"।

इति रायमुकुटः। "ओड्रपुष्पकुसुमप्रियेऽम्बिके"। इति हरानन्दः॥ इत्यमरटीकायां भरतः॥

ओड्राख्या, स्त्री, (ओड्रमाख्या यस्याः।) जवापुष्पवृक्षः। इति राजनिर्घण्टः॥

ओण, ऋ अपसारणे। दूरीकरणे॥ इति कविकल्पद्रुमः॥ (भ्वादिं-परं-सकं-सेट्।) अपसारणमपनयनम्। मा भवान् ओणिनत्। ओणति धनम् चौरः। इति दुर्गादासः॥

ओतुः, पुं स्त्री, (अवति गृहमाखुभ्यः। अव रक्षणे+"सितनिगमिमसिसच्यवीति" १। ७०। उणादिः तुन्। "ज्वरत्वरेति" ६। ४। २०। ऊट् ततो गुणः।) विड़ालः। इत्यमरः। (यथा मुग्धबोधे। "स्थूलोतुः। स्थूलौतुः॥)

ओदनः, पुं क्ली, (उन्द+"उन्देर्नलोपश्च" इति २। ७६। उणादिः युच्+नलोपश्च।) अन्नम्। भक्तम्। इत्यमरः॥ भात इति भाषा।

(यथा मनुः। ८। ३२९।

"अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च"॥

"ओदनः च्चालितः स्विन्नः प्रस्रुतो विशदो लघुः।
भृष्टतण्डुलजोऽप्ययमन्यथा स्याद्गुरुश्च सः"॥

इति वैद्यकचक्रपाणिकृतद्रव्यगुणे मद्यादिवर्गे॥

"ओदनस्तैः शृतो दिग्धैः प्रयोक्तव्यो यथायथम्।
दोषदूष्यादिबलतो ज्वरघ्नः क्वाथसाधितः"॥

इति वाभटे चिकित्सास्थाने। १ अध्याये॥

अस्य पर्य्यायश्चाह भावप्रकाशकारः॥

"भक्तमन्नं तथान्धश्च क्वचित्कूरञ्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि भाषितः"॥

अस्य विवरणान्तरञ्चान्नशब्दे ज्ञेयम्॥)

ओदनाह्वा, स्त्री, (ओदनस्याह्वा इव आह्वा यस्याः।) महासमङ्गा। इति राजनिर्घण्टः॥

ओदनिका, स्त्री, महासमङ्गा। बला। इति राजनिर्घण्टः॥

ओदनी, स्त्री, (ओदन इवाचरति। ओदन+क्विप्+ङीष्।) बला। इति मेदिनी॥ वेलेड़ा इति भाषा। (बलाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

ओम्, व्य, (अवति रक्षति इति। "अवतेष्टिलोपश्च"।१।१४१।उणादिः मन् टिलोपश्च। ज्वरत्वरेत्यूट् ६।४।२०॥ ततो गुणः।) प्रणवः। स तु अकारोकारमकारवर्णत्रयात्मकः। तथा च उक्तम्।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः॥

("यथा पर्णं पलाशस्य शङ्कुनैकेन धार्य्यते।
तथा जगदिदं सर्व्वमोङ्कारेणैव धार्य्यते"॥

इति याज्ञवल्क्यः। तथा, मनुः। २। ७६।

"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः।
वेदत्रयात् निरदुहत् भूर्भुवःस्वरिति त्रिधा"॥

"ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तस्मात् माङ्गलिकावुभौ"॥

इति दुर्गादासः। योगी याज्ञवल्क्यश्च।

"सिद्धानाञ्चैव सर्व्वेषां वेदवेदान्तयोस्तथा।
अन्येषामपि शास्त्राणां निष्ठाऽप्योङ्कार उच्यते॥
प्रणवाद्या यतो वेदा प्रणवे पर्य्यवस्थिताः।
वाङ्मयं प्रणवः सर्व्वं तस्मात् प्रणवमभ्यसेत्"॥)

अनुमतिः। इति विश्वः॥ उपक्रमः। अङ्गीकारः। (यथा, भागवते ११। ४। १५।

"ओमित्यादेशमादाय नत्वा तं सुरवन्दिनः।
उर्व्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः"॥)

अपाकृतिः। मङ्गलम्। इति मेदिनी॥

ओम्, क्ली, ब्रह्मणो नामविशेषः। यथा,—

"ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा॥
तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्"॥

इति श्रीभगवद्गीतायां १७ अध्यायः॥

ओलं त्रि, (आङ्+उन्द+क। पृषोदरादित्वात् साधु।) आर्द्रम्। इति त्रिकाण्डशेषः। भिजा इति भाषा॥

ओलः, पुं, स्वनामख्यातमूलविशेषः। शूरणः। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा॥

"शूरणः कन्द ओलश्च कन्दलोऽर्शोघ्न इत्यपि"।

गुणा अस्य शूरणशब्दे ज्ञेयाः॥)

ओलज, इ, क्षेपणे। इति कविकल्पद्रुमः॥ (भ्वादिं-परं-सकं-सेट्।) अन्तस्थतृतीययुक्तः। इ ओलञ्ज्यते धूलिर्वायुना। इति दुर्गादासः॥

ओलड, इ कि उत्क्षेपे। इति कविकल्पद्रुमः॥ (वा चुरां-उभं-सकं-सेट्।) अन्तस्थतृतीयोपधः। इ ओलण्ड्यते। कि ओलण्डयति ओलण्डति तण्डुलं लोकः। कर्पूरमोलण्डयतीति दर्शनात्। इति दुर्गादासः॥

ओल्लः, पुं, ओलः। तत्पर्य्यायः। शूरणः २ कन्दः ३ अर्शोघ्नः ४ चित्रदण्डकः ५। इति रत्नमाला॥ अस्य गुणाः। अग्निदीपनत्वम्। रुचिकारित्वम्। कफनाशित्वम्। विशदत्वम्। लघुत्वम्। अर्शोरोगपथ्यत्वञ्च। ग्राम्यकन्दस्तु दोषलः॥ इति राजवल्लभः॥

ओषः, पुं, (उष+दाहे घञ्।) दाहः। तत्पर्य्यायः। प्रोषः २। इत्यमरः॥ प्लोषः ३। इति भरतः॥ (पित्तविकाराश्चत्वारिंशदत ऊर्द्ध्वं व्याख्यास्यन्ते। यथा ओषश्च प्लोषश्च इत्यादि। चरके सूत्रे। २० अः॥)

ओषणः, पुं, (उष+ल्युट्।) कटुरसः। इति हेमचन्द्रः॥ झाल इति भाषा॥

ओषणी, स्त्री, (ओषण+ङीष्।) शाकविशेषः। पुद्याति इति भाषा। अस्या गुणः। कफवायुनाशित्वम्। इति राजवल्लभः॥

ओषधिः, स्त्री, (ओषो धीयतेऽत्र। ओष+धा+कि।) फलपाकान्तवृक्षादिः। कदली धान्यमित्यादिः। इत्यमरः॥ (यदाह मनुः। १। ४६।

"उद्भिज्जाः स्थावरा ज्ञेया बीजकाण्डप्ररोहिणः।
ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः"॥

तथा, कुमारे १। १०। "भवन्ति यत्रौषधयो रजन्याम्"। तथा ७। १ "अथौषधीनामधिपस्य वृद्धौ"। "ओषधयः प्रशुष्यन्ति गवादीनां यथांसिच। इति हारीते प्रथमस्थाने॥ ४ अध्याये॥

"ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने।
अविपाश्चैव गोपाश्च ये चान्ये वनवासिनः॥
न नामज्ञानमात्रेण रूपज्ञानेन वा पुनः।
ओषधीनां परां प्राप्तिं कश्चिद्वेदितुमर्हति॥
योगविन्नामरूपज्ञस्तासां तत्त्वविदुच्यते।
किं पुनर्यो विजानीयादोषधीः सर्व्वथा भिषक्॥
योगमासान्तु यो विद्याद्देशकालोपपादितम्।
पुरुषं पुरुषं वीक्ष्य स विज्ञेयो भिषक्तमः"॥

इति चरके सूत्रस्थाने॥ १ अध्याये॥)

ओषधिप्रस्थः, पुं, (ओषधिबहुलं प्रस्थं यत्र। ओषधीनामाकरत्वात् हिमालयस्य तथात्वम्।) हिमालयस्य नगरम्। (यथा, कुमारे ६। ३३।

"तत्प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम्"।

तत्रैव ६। ३६। "आसेदुरोषधिप्रस्थम्" इति।) तथा,—कालिकापुराणे ४१ अध्यायः।

"एतस्मिन्नन्तरे शम्भुः शिप्रं त्यक्त्वा तदा सरः।
गङ्गावतारमगमद्धिमवत्प्रस्थमुत्तमम्॥
यत्र गङ्गा निपतिता पुरा ब्रह्मपुरात् स्रुता।
ओषधिप्रस्थनगरस्यादूरे सानुरुत्तमः॥
तत्र भर्गः समात्मानमक्षरं परमात्परम्।
एकाग्रं चिन्तयामास भगवान् वृषभध्वजः"॥

ओषधी, स्त्री, (ओषधि+ङीष्।) ओषधिः। इति भरतः॥ (फलपाकान्तवृक्षः। स च कदलीधान्यादिः। यथाह मनुः। १। ४६।

"उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः।
ओषध्यः फलपाकान्ताः बहुपुष्पफलोपगाः"॥

ओषधिशब्देऽस्या विवृतिर्ज्ञेया॥)

ओषधीपतिः, पुं, (ओषधीनां पतिः।) चन्द्रः। इति हेमचन्द्रः॥ (कर्पूरं। चन्द्रसंज्ञत्वादस्य तथात्वम्॥)